क्रं १९ संस्कृत

दान खंड.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशायनमः ॥ अथदानखंडप्रारंभः ॥ तत्रादौदानप्रशंसामाह ॥
श्रुतिः ॥ तथाचयाज्ञवल्क्यः ॥ देशकालेउपायेनद्रव्यंश्रद्धासमन्वितं ॥ पा
त्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणं ॥ १ ॥ नविद्ययाकेवलयातपसाकेवलेन
हि ॥ विद्यातपोभ्यांयुक्तंयत्तत्पात्रंप्रचक्षते ॥ २ ॥ पात्रेदत्तंतुयत्किंचिच्छ्र
द्धयासमाहितः ॥ यद्दत्तंतत्सर्वमक्षय्यंमहादानादिकंचयत् ॥ ३ ॥ ददातिप्रत्य
हंवस्तुहिरण्यादिकमेवच ॥ भुक्त्वाभोगान्यथाकामान्सोऽश्नुतेपदमव्ययं
॥ ४ ॥ अथषोडशमहादानानि ॥ कनकाश्वतिलानागादासीरथमहीगृहाः ॥
कन्याचकपिलाचैवमहादानानिवैदश ॥ १ ॥ छायाजिनंचमहिषीमेषीचोभ
यतोमुखी ॥ प्रतिपुरुषंकालपुरुषंनभुयःपुरुषोऽभवेत् ॥ २ ॥ हिरण्यमंनमुद
कंपलपुष्पादिकंचयत् ॥ यत्किंचित्प्रत्यहंदेयंयथावित्तानुसारतः ॥ ३ ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

क

दानखं- दानंनैमित्तिकंदद्यात्संकल्प्ययथाविधि ॥ नित्यदानेतुनैवास्यात्संकल्प्या
१ दिफलादिकं ॥ ४ ॥ सर्वत्रप्राङ्मुखोदातागृहीतस्यादुदङ्मुखः ॥ सजलं
दक्षिणायुक्तंदद्याद्विप्रकरेसदा ॥ ५ ॥ वित्तंविप्रकरेदत्तंसद्यःशतगुणंभवे
त् ॥ आलस्यादथवाभ्रांत्यानिष्फलंस्याद्दिनांतरे ॥ ६ ॥ यत्तुसंकल्पितंद्र
व्यंयद्दिनेचेत्रदीयते ॥ द्विगुणंस्याद्द्वितीयेह्नितृतीयेत्रिगुणंभवेत् ॥ ७ ॥ अ
थगोदानं ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्या
दिहलोकेपरत्रच ॥ १ ॥ कपिलेसर्वदेवानांपूजनीयासिरोहिणी ॥ तीर्थदेव
मयेयस्माद्दतः० ॥ २ ॥ [illegible]धेनोनमस्तुभ्यंब्रह्मविष्णुशिवात्मके ॥ जन्मप्रभृ
तिपापानि[illegible]नाशयनेसदा ॥ ३ ॥ भूमिदानं ॥ सर्वेषामाश्रयोभूमिर्वराहे
णसमुद्धृता ॥ अनंतसस्यफलमतः० ॥ ४ ॥ यस्यांरोहंतिबीजानिकालेचैव राम

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

महातले॥त्वत्प्रसादाच्चसकलाममसंतुमनोरथाः॥दानान्यंन्यानिसर्वाणिक
नकादीनयानिच॥तानिभूमिप्रदानस्यकलांनार्हंतिषोडशीं॥३॥हिरण्य
दानं॥हिरण्यगर्भगर्भस्थंहेमबीजंविभावसो॥अनंतपुण्यफलदमतः॥
॥२॥आज्यदान॥कामधेनोःसमुद्भूतंसर्वयज्ञेषुसाधनं॥देवानामाज्यमाहा
रमतः॥१॥धान्यदान॥धान्यंकरोतिदातारामिहलोकेपरत्रच॥यस्मात्त
मुच्यतेधान्यमतः॥१॥वस्त्रदान॥शीतवातोष्णसंत्राणंलज्जायारक्षणंपरं॥
सुवेषवस्त्रदानेनमतः॥१॥पीतांबरदान॥पीतांबरंसदापुण्यंदेवानांप
रमंप्रियं॥दानेनानेनमेपापहरत्वंहेमसंनिभं॥१॥रक्तवस्त्र॥रक्तवस्त्रंमहा
पुण्यमादित्यस्यप्रियंसदा॥शुभदंसर्वलोकानांमतः॥१॥चित्रवस्त्र॥षण्मु

गुडस्य॥ यथादिवेषुविश्वात्माप्रवरास्तुजनार्दनः॥ सामवेदस्तुवेदानांमहादेव
स्तुयोगिनां॥ प्रधानःसर्वदेवानांदेवानांपार्वतीयथा॥ तथारसानांप्रवरास्तंचे
विस्तुरसोद्भवे॥ समस्तस्मात्परांलक्ष्मीददस्वगुडसर्वदा॥८॥ लवणं॥ यस्मादन
रसासर्वनोत्कृष्टालवणंविना॥ प्रभोप्रीतिकरंनित्यमतःशांति॥९॥ रौप्य॥ पितॄ
णांतृप्तिदंनित्यंविष्णोर्वेषुंकरस्यच॥ तस्माद्देयप्रदानेनमतःशांति॥१०॥ अथक्ले
शदानानि॥ र्थंममशरीरेबालपित्तश्लेष्माणांसाम्येनवैषम्येनवाउत्पन्नउत्पत्स्यमा
नविविधपीडानिरसनपूर्वकंश्रीपरमेश्वरयमधर्मात्मकमहाविष्णुप्रीत्यर्थंहेलोह
लवणादिदानानिकरिष्ये॥ तस्मात्वसर्वकर्माणित्वदाधाराणिसर्वप्राः॥ हेलोहलांग
लांगलोब्रह्मा

(३अ)

चित्रवस्त्रं। षण्मुखस्यप्रियंनित्यंचित्रवस्त्रंमनोहरं॥ तस्मादस्यप्रदानेन

शांतिरस्तुसदामम॥ १॥ कृष्णवस्त्रं॥ कृष्णवासः प्रियंमृत्योसर्वानिष्टनि

वारणं॥ भयनाशकरंपुण्यमतःशांतिंकरोतुमे॥ १॥ मनोहरंकृष्णवस्त्रं

बलभद्रप्रियंसदा॥ आयुर्वर्धयमेनित्यंब्रह्मणानिर्मितंपुरा॥ २॥ पट्ट

वस्त्रं॥ पट्टकूलसदापुण्यंपवित्रंकांतिदंशुभं॥ सर्वदेवप्रियंयस्मादत्तम

०१॥ कंबलं॥ हिमनाशंकरंपुण्यंकंबलंबलवर्धनं॥ दानेनानेनवैयस्मा

मतः०१॥ सकलातिदानं॥ उर्णजंचाविकंपुण्यंसर्वलोकप्रियंशुभं॥ स

दापवित्रंपरमतः०१॥ स्वस्तकर्पटदानं॥ कीटजंतसरंपुण्यंअटव्य

द्रुमसंभवं॥ पवित्रंसर्वदायस्मादतः०१॥ गुडदानं॥ गुडमिक्षुरसोद्भूतंर

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

दानखंड ३

सानांपरमंवरं ॥ दानेनानेनमेयस्माछांतिरस्तुसदामम ॥ १ ॥ शर्करादानं ॥
शर्करेक्षुरसोद्भूतासदास्वादुकराशुभा ॥ दानेनानेनमेनित्यमतः ॰ १ ॥ रौप्यं ॥
पितॄणांवल्लभंयस्माद्विष्णोर्वैशंकरस्यच ॥ रजतंपातुमांनित्यंशोकसंसा
रसागरात ॥ १ ॥ लवणं ॥ अन्नाद्याःस्वादुतांयांतिलवणेनरसाश्चये ॥ नि
त्यंलवणदानेनममसंतुमनोरथाः ॥ १ ॥ अथनानाधान्यदानं ॥ व्रीहिदा
नं ॥ ब्रह्मणानिर्मिताःपूर्वंव्रीहयोयज्ञसाधनाः ॥ अनेनव्रीहिदानेनममसं
तुमनोरथाः ॥ १ ॥ व्रीहिजास्तंडुलाःशुभ्राःपितृदेवद्विजप्रियाः ॥ दानेना
नेनमेसंतुसर्वकामाश्चसंपदाः ॥ १ ॥ तोवरी ॥ रामदेहसमुद्भूतेमद्दिकाप ३
पनाशमे ॥ आढकःसर्वपापघ्नमतः ॰ १ ॥ गोधूमं ॥ धान्यचूडामणिर्जंबु

(5A)

प्रकिरणं पुण्यम० २५ ॥ शिबिका ॥ शिबिका सुखदा नित्यं महालक्ष्मीप्री
यासदा ॥ संप्रदानेन वै तस्याः शांति० २६ ॥ मंचकं ॥ मंचको रोगनाशघ्नः
सर्वसौख्यप्रदायकः ॥ संप्रदानेन मे नित्यं शांतिरस्तु सुखालये ॥ २७ ॥ श
यनं ॥ सुखदं शयनं यस्मात्केशवस्य प्रियं सदा ॥ दानेनानेन सौभाग्यं स
र्वदास्तु गृहे मम ॥ २८ ॥ कशिपुः ॥ मृदु निर्बीजकार्पासपूरितं सुखदं
नृणां ॥ कशिपेस्त्र प्रदानेन सुखं स्यात्सर्वदा मम ॥ २९ ॥ तांबूलं ॥ तांबुलं
शुभदं लोके सर्वदा मंगलप्रदं ॥ प्रियं चैव हि देवानां मलः ० ३० ॥ तिलपात्रं ॥
दंच तिलपात्रं पुण्यं स्वर्णपरिपूरितं ॥ दानेनानेन मे नित्यं सर्वारिष्टप्रशाम्य
तु ॥ ३१ ॥ सर्वदेवमयं धान्यं सर्वप्रीतिकरं महत् ॥ प्राणिनां जीवनं धान्यं

(5)

दानखंड मत॰॥ ३२॥ दासी॥ दासीयं प्रत्यहं गेहे मार्जनादिक्रियाकरी॥ संप्रदानेन वै
चास्याः स्मरवसंपत्त्स दास्कते॥ ३३॥ शय्यादानं॥ तांबुलं पुष्पसहितं नानाप
५ रिमलैर्युतं॥ वस्त्रेणाच्छादिता शय्या नानारत्नसमन्विता॥ ३४॥ धूपसहान्वि
तं भव्यं भाजनं कांस्यनिर्मितं॥ मंचकोपभयतो दीपं व्यजनं च सुगंधिकं॥ ३५॥
सजलं कलशां दंडं वैणवं च यथा तथा॥ स्थापितं शिरसो भागे पाददेशे त्युपा
नहो॥ ३६॥ कर्पूरैलालवंगादि द्रव्यं प्रीतिकरं शुभं॥ नीरांजनकं कस्तू
रीहरिद्राकुंकुमांबरं॥ ३७॥ सकंचुकं तथा खाद्यं विन्यसेच्छयने शुभे॥
पुरतो गंधपात्रादि लियां चैवासनं न्यसेत्॥ ३८॥ पृष्ठदेशेतु वै छत्रं न्यसे
त्पूजां समाचरेत्॥ ततो विप्रं समभ्यर्च्य दानं दद्याद्यथोचितं॥ ३९॥ श्रो ५

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

यनं मंचकं नव्यं पदेनैव समन्वितं ॥ प्रसार्यार्थं नवं तत्र कशिपुं चोपबर्हणं ॥
सोपस्करं समायुक्तं नारत्नोपशोभितं ॥ पुष्पतांबुलसहितं नानापरिमलान्वि
तं ॥ ४० ॥ मंचको रोगनाशघ्नो अपस्कल्यांशायनं यस्मात् ॥ मृदुलं निबीजकापा
सतांबुलं शुभप्रदं ॥ ४१ ॥ दीपं ॥ दीप ज्ञानप्रदो नित्यं देवतानां प्रियः सदा ॥
दानेनास्य भवेत्सौख्यं शांतिर्मे वांछितं फलं ॥ ४२ ॥ सज्योतिगुणपात्रं च दीप
वाहं समुंनतं ॥ सुखदं चास्य दानेन शांतिरस्तु सदा मम ॥ ४३ ॥ हरिद्रा ॥ गौरि
प्रिया हरिद्रा च नित्यं कल्याणदायिनी ॥ दानेनास्याः सुखं शांतिः संपदस्तु सदा
मम ॥ ४४ ॥ कुंकुमं ॥ कुंकुमं शोभनं दिव्यं सर्वमंगलप्रदायकं ॥ दानेनास्य स
दा सौख्यं सौभाग्यं शांतिरस्तु मे ॥ ४५ ॥ सिंदूरं ॥ सिंदूरं शुभदं चैव गणना
थप्रियं सदा ॥ दानेनास्य सुखं भाग्यं शांतिश्चास्तु सदा मम ॥ ४६ ॥ कस्तू

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

दान० ३
७

री ॥ कस्तूरी भाग्यदा भव्या देवमर्त्यप्रियासदा ॥ दानेनास्याः सुखं भाग्यं शां
तिश्चास्तु सदा मम ॥ ५७ ॥ कलश दानं ॥ कलशं शुभदं दिव्यं जलेन परिपूरि
तं ॥ दानेनास्य सदा सौख्यं शांतिरस्तु गृहे मम ॥ ५८ ॥ गंधदानं ॥ गंधो मनो
हरो भव्यो शांतिदः सुखदः सदा ॥ संप्रदानेन चैवास्य शांति० ॥ ५९ ॥ पुष्प
दानं ॥ मनोहराणि पुष्पाणि द्रव्याणि सुखदानि हि ॥ संप्रदानेन चैतेषां शां
ति० ५० ॥ कर्पूरं ॥ कर्पूरं तु चिरं विप्र गृहाणेमं सुपूजितः ॥ पुण्यगंधाखि
लासा मे कमला प्रीयतामिति ॥ ५१ ॥ दंडः ॥ भयनाशंकरो दंडो वैणवो देव
निर्मितः ॥ दानेनानेन चैवास्य शांति० ॥ ५२ ॥ संपदां भूषणं छत्रं उपानहौ
प्रदापयेत् ॥ सौभाग्य द्रव्यदानं च स्त्रिभिः कार्यं प्रयत्नतः ॥ ५३ ॥ संक्रांतौ
षोडशपलदानं ॥ सभर्तृकाभिः संक्रांतौ फलादीनां तथैव च ॥ दानं षोडश ७

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

संख्याकं एकैकस्य फलस्य च ॥ ५४ ॥ हेमराजतकांस्यानां भाजनानि यथाभ
वेत् ॥ तिलगुडदानं ॥ सगुडं तिलसंयुक्तं ग्रामप्रीतिकरं नृणां ॥ वर्धितं च
गृहाणेदं मतः० ५५ ॥ हिरण्यादी निपात्राणि भांडानि मृन्मयानि च ॥ गृहाणे
मानि देयस्माद्भास्करप्रीयतामिति ॥ ५६ ॥ गोधूमपिष्टज्ञिला ॥ गोधूमज
निलां पिष्टं ज्ञिलायच विनिःसृतं ॥ द्विजः श्री छु गृहाण त्वमतः० ५७ ॥ तंडु
लदानं ॥ तंडुलाः शालिजाः शुभ्राः सजलाः शूर्पसंस्थिताः ॥ संप्रदानेन वै
तेषां शांतिरे० ५८ ॥ परमान्नं ॥ सौवर्णभाजनं कांस्यपायसान्नादिपूरितं ॥
दानेनास्य च सौभाग्यं शांति० ॥ ५९ ॥ फलपुष्पदाने भागेवोक्तं ॥ कदलिदा
नं ॥ कदलिसर्वदोषघ्नी हेमपर्णाबिराहता ॥ दानेनास्याः सुखं भाग्यं शांति
रस्तु सुखवयो ॥ ६० ॥ सुवर्णादिपात्रदाने ॥ जन्मांतरसहस्रेषु यत्कृतं
दुष्कृतं मया ॥ स्वर्णपात्रप्रदानेन मम पापं व्यपोहतु ॥ ६१ ॥ रौप्यपात्रं ॥ कन्या

(७)

दा·खं·उ दूषणनः पापंपरदाराभिदर्शनात् ॥ रौप्यपात्रप्रदानेनपापंगच्छतुमेसदा ॥ ६२
ताम्रपात्रं ॥ परापवादपैशून्यंदुष्टमांस्यसभक्षणं ॥ पापंगोत्राश्रितंताम्रपा
त्रदानेननश्यतु ॥ ६३ ॥ कांस्यपात्रं ॥ मयापापान्यनेकानिकामाकामकृता
निच ॥ कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा ॥ ६४ ॥ लोहपात्रं ॥ ज्ञानाज्ञा
नकृतंपापंमयालोहकृतंचयत् ॥ लोहपात्रप्रदानेनममपीडांव्यपोहतु ॥ ६५
सूर्यप्रीतिकरंताम्रंआरोग्यंबलवर्धनं ॥ तस्मादस्यप्रदानेनममपीडांव्यपोह
तु ॥ ६६ ॥ कांस्यंब्रह्माशिवःसाक्षात्कांस्यमेतद्विभावसुः ॥ कांस्यंविष्णुमयंय
स्मात्तस्मात् ॥ ६७ ॥ रत्नदानं ॥ यस्मात्सर्वेषुरत्नेषुदेवाःसर्वेव्यवस्थिताः ॥ रत्न
दानेनमेशांतिंप्रयच्छंतुसदासुराः ॥ ६८ ॥ माणिक्य ॥ माणिक्यंपद्मरागंच
वैडुर्यंवज्रमेवच ॥ गोमेदाख्यमरकतंपुष्परागंचमौक्तिकं ॥ ६९ ॥ हिरा ॥
ह रितंनववैतानिरत्नानिहवदंतिहि ॥ मौक्तिकंभूषणंदिव्यंस्त्रियोगोयी

(7A)

शिवस्यच ॥ ७० ॥ प्रवाल ॥ दानेनास्यशिवं मेस्तु परत्रच सुखं सदा ॥ प्रवाल पु
ष्टिकं कांतिं वर्धनं पुष्टिसंपदा ॥ दानेनास्य सुखं चैव मतः ० ॥ ७१ ॥ मंगलसू°
मांगल्यमणयोलक्ष्म्याः प्रिया गौर्योश्च सर्वदा ॥ दानेनैषा सुखं शांतिं सर्वा
रिष्टाप्रशाम्यतु ॥ ७२ ॥ कर्णपात्रं ॥ कर्णपात्रं सदा स्त्रीणां भूषणं मंगलप्र
दं ॥ दानेनास्यास्तु मे शांतिं सर्वारिष्टप्रशाम्यतु ॥ ७३ ॥ तैलं ॥ तैलं पुष्टिकरं नृ
णां लक्ष्मीदं मंगलप्रदं ॥ दानेनास्यतु मे शांतिं सर्वारिष्टप्रशाम्यतु ॥ ७४ ॥
गजादिदानं ॥ ऐरावतश्चतुर्दंतो गजानां नायकश्च यः ॥ दिग्दंतिनः पूज्यतं
मेंद्रं यं क्षपयतु भ्रमः ॥ ७५ ॥ सुप्रतीकगजेंद्रं त्वं सरस्वत्याभिषेचनं ॥ इंद्रस्यवा
हनं श्रेष्ठं सर्वदे वैश्चपूजितः ॥ ७६ ॥ गजेंद्र मत्तमातंगरिपुसैन्यविनाशक ॥
लवदानेन मे शांतिः सर्वदास्तु सुखं शिवं ॥ ७७ ॥ अश्वदानं ॥ अश्वो हि वाहनं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8)

दानखं

भानोकारणंहिश्रातक्रतोः॥ संप्रदानेन मे चास्य शांतिरस्तु सुखं शिवं॥ ७८॥ वृषभः
॥ वृषभो धर्म एव स्यान्महादेवप्रियं सदा॥ संप्रदानेन देवेचास्य मतः॥ ७९॥ अजः॥
अजो ग्निवाहोयज्ञार्थं ब्रह्मणा निर्मितः पुरा॥ मेषप्रदानेन वै शांतिसुखंचास्तु सदा
मम॥ ८०॥ छागप्रियोहियज्ञानां माहुतित्वे व्यवस्थितः॥ अस्यचैव प्रदानेन म०
॥ ८१॥ अथ देवताप्रतिदानं॥ मृत्युंजय महादेव गौरीश वृषवाहन॥ संप्रदाने
न ते शंभु मम संतु मनोरथाः॥ ८२॥ महाकाशीनिवासी च महादेवो महेश्वरः॥
शिवलिंगप्रदानेन प्रसंनो भव मे सदा॥ ८३॥ श्रीवत्सैः शिवसाक्षात्साक्षान्ना
रायणोपि चः॥ दानेनास्य हरिहरौ प्रसंनो तां सदा वयोः॥ ८४॥ शालग्रामः॥
शालग्रामशिला पुण्या भुक्तिमुक्तिप्रदायिनी॥ शालग्रामप्रदानेन मम संतु

(8A)

मनोरथाः ॥ ८५ ॥ चक्रांकित ॥ चक्रांकितसमायुक्ता द्वारावत्यामशिलाभुवाः ॥ दानेनै
व भवेत्तस्य उभयोर्वांछितं फलं ॥ ८६ ॥ शंख ॥ शंखः शुभकरो नित्यं सर्वमंगल
दायकः ॥ यस्मात्तस्य प्रदानेन मशांति० ॥ ८७ ॥ घंटा ॥ घंटादेवप्रियो नित्यं महान
दकराशुभा ॥ संप्रदानेनैमे तस्या शांतिरस्तु सुखं सदा ॥ ८८ ॥ नारायणमूर्तिदानं ॥
नारायण जगन्नाथ श्रीपते गरुडध्वज ॥ तव मूर्तिप्रदानेन प्रसंनो भव मे सदा ॥ ८९
सूर्यग्रहण ॥ ग्रहाणामाधिपः सूर्यः पद्महस्तप्रभाकरः ॥ दानेनास्य रवेः शांतिं सुखं चास्तु
सदा मम ॥ ९० ॥ गणनाथ ॥ गणनाथो विघ्नराजो गौरीसूनुरभीष्टदः ॥ अस्य दानेन
मे शांतिः प्रसंनोस्तु विनायकः ॥ ९१ ॥ शक्ति ॥ आदिमाया महाशक्ति विश्वमाता
जगन्मयी ॥ दानेनास्य प्रसंनोस्तु सर्वदा मम शांभवी ॥ ९२ ॥ पुस्तक ॥ सरस्वतीज

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9)

दान खंड गन्मातः श्राद्धब्रह्मादिदेवता ॥ युक्तकस्य प्रदाने नरक्षमां परमेश्वरी ॥ १३ ॥ सोप
स्कर सदायुक्तामि मां मूर्तीस दक्षिणां ॥ गृहाण त्वं द्विजश्रेष्ठ ममसंतु मनोरथाः ॥
१० १४ ॥ देशकाल उपायेन द्रव्यं श्रद्धासमन्वितं ॥ पात्रे प्रदीयते यत्तु सकलं धर्म
लक्षणं ॥ १५ ॥ न विद्यया केवलया तपसा केवलेन हि ॥ विद्यातपोभ्यां हृत्तं यत्त
तं त्पात्रं प्रचक्षते ॥ १६ ॥ पात्रे दत्तं तु यत्किंचित्प्र[illegible]चिर्भूत्वा समाहितः ॥ ज्ञेयं तत्स
र्वमक्षय्यम महादानादिकं च येन ॥ १७ ॥ ददाति प्रत्यहं यस्तु हिरण्यादिकमे
व च ॥ भुक्त्वा भोगान्यथाकामान् सोऽश्नुते पदमव्ययं ॥ १८ ॥ दानं नैमित्तिके
दद्यात्तत्सकल्प्य यथाविधि ॥ नित्यदाने तु नैवस्यात्संकल्पादि फलादिके
॥ १९ १० ॥ इति धर्मप्रवृत्ति दानखंड समाप्तिं द पुस्तकं समाप्तं ॥ ॥ ॥ ॥ १०

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com